# संस्कृत-वार्ता:

दिनाङ्कः-29.04.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिनोक्तम् यत् एकविंशति-शताब्द्याः आवश्यकतां पूरयितुं प्रशासनं देशस्य शिक्षा-व्यवस्थाम् आधुनिकीकरोतीति ।
- भारतेन संयुक्तराष्ट्रे पहलगमातङ्क्याक्रमणं निध्याय पाकिस्तानम् कट्वालोचितम्,उक्तम् च यत् पाकिस्तानं वैश्विकम् आतङ्कवादं प्रेरयत् दुष्टराज्यत्वेन इति गण्यते।
- प्रधानमन्त्री नरेन्द्रमोदी कनाडादेशस्य नवनिर्वाचिताय प्रधानमन्त्रिपदाय मॉर्क-कार्ने-इत्येतस्मै वर्धापनानि प्रदत्तवान्।
- उत्तराखण्डराज्ये श्व: अक्षय-तृतीयाया: शुभपर्वणि गङ्गोत्री-यमुनोत्री-इत्येतयो: धाम्नो: कपाटं श्रद्धावनतेभ्य: जनेभ्य: उद्घाटयिष्यते।
- आई.पी.एल्. इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् अद्य डेल्ही-कैपिटल्स-कोलकाता नाइट-राइडर्स-दलयोर्मध्ये द्वन्द्वं भविष्यति।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् अस्ति यत् एकविंशति-शताब्द्याः आवश्यकतां पूरयितुं प्रशासनं देशस्य शिक्षा-व्यवस्थायाः आधुनिकीकरणं कुर्वदस्तीति । असौ इत्यपि कथितवान् यत् केन्द्रेण देशस्य प्रत्येकस्य छात्रस्य कृते विश्वस्तरीयज्ञानम् आनीयते । अद्य नवदिल्ल्याम् भारतमण्डपम् इत्यत्र प्रशासनस्य , शैक्षणिकस्य, उद्योगस्य, नवान्वेषकाणाञ्च

नेतॄन् सम्मिल्य प्रथम-प्रकारस्य व्यूहात्मक-सम्मेलनस्य युग्म **इतीदं** सम्मेलनम् अभिसम्बोधयन् श्रीमोदी एतत् सर्वमुक्तवान्। अनेनोक्तं यत् देशस्य भविष्यं तस्य युवसमूहस्य साहाय्येन अवलम्बितम् अस्ति, अत एव भारतस्य उज्ज्वलभविष्यस्य कृते तान् यूनः सज्जीकर्तुं महत्त्वपूर्णम् अस्ति। प्रधानमन्त्री अग्रे अवदत् यत् नूतनशिक्षानीतिः देशे परिवर्तनाय प्रेरयति इति। अपि च प्रतिभायाः, स्वभावस्य, **प्राविधिकस्य** च त्रिमूर्तिः भारतस्य भविष्यं परिवर्तयिष्यति इति।

श्रीमोदिना प्रतिपादितं यत् भारतस्य विश्वविद्यालयपरिसराः गतिशीलकेन्द्रत्वेन उदीयमानाः वर्तन्ते। अमुना भणितं यत् एकं राष्ट्रं एका सदस्यता इति विश्व-स्तरीयज्ञानं प्रत्येकस्मै विद्यार्थिने सुगम्यं करोतीति । प्रधानमन्त्रिणा अग्रे निगदितं यत् प्रशासनं **मेक एआइ इन इंडिया** इत्येतस्य दृक्पातस्य लक्ष्ये कार्यं निष्पादयदस्ति ।

समायोजितस्य अस्य सम्मेलनस्य उद्देश्यम् भारतस्य नवाचार-प्रणाल्यां बृहत्तमे स्तरे स्वायत्तनिवेशाय प्रेरणाप्रदानम् अथ च अग्रगामिनि प्राविधिक्यां अनुसन्धानेन व्यावसायिकरणे तीव्रताया: आगमनमिति वर्तते।

<u>प्रधानमन्त्री-सम्मेलनम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां स्वनिजावासे रक्षामन्त्रिणा राजनाथसिंहेन राष्ट्रियसुरक्षापरामर्शकेन अजीज डोभालेन अथ च सैन्यप्रमुखेण अनिल-चौहानेन तिसृणां सेनानाञ्च प्रमुखै: सह एकम् उपवेशनम् समनुष्ठितवान्। इदम् उपवेशनम् पहलगामे आतङ्कवादाक्रमणम् अभिलक्ष्य समाचारितम्।

<u>संयुक्तराष्ट्रसङ्घ-पहलगामः</u>

भारतेन संयुक्तराष्ट्रे पहलगमातङ्क्याक्रमण-विषय: दृढतया उत्थापित: तथा च आतङ्कवादिनां कृते प्रशिक्षणं वित्तपोषणं च कर्तुं पाकिस्तानस्य एकस्य मन्त्रिणः "स्वीकारोक्तिः" अपि उल्लिखिता। संयुक्तराष्ट्रे भारतस्य उपस्थायिप्रतिनिधिः योजना-पटेल: पाकिस्तानस्य रक्षामन्त्रिणः ख्वाजा आसिफ इत्यस्य सद्य एव प्रदत्तं साक्षात्कारं प्रदर्शयन्ती अवदत् यत् पाकिस्तानस्य रक्षामन्त्रिणं सर्वेऽपि श्रुतवन्तः यत् आतङ्कवादीसङ्घटनानां कृते समर्थनस्य, प्रशिक्षणस्य, वित्तपोषणस्य च पाकिस्तानस्य व्यवहारस्य विषये च सम्पूर्णं विश्वं श्रुतवत्। सा इत्यपि अवदत् यत् मुक्तकण्ठेन स्वीकृता स्वीकारोक्ति कस्मैश्चिदपि आश्चर्यं न जनयति। एवञ्च पाकिस्तानं वैश्विकं आतङ्कवादं प्रेरयत् अथ च क्षेत्रं अस्थिरं कुर्वत् दुष्टराज्यत्वेन इति गण्यते। राजदूतः पटेलः अपि पाकिस्तानस्य आलोचनां कृतवती यत् पाकिस्तानदेशः भारतस्य विरुद्धं निराधारारोपस्य आरोपणाय दुष्प्रचाराय च वैश्विकमञ्चस्य अस्य दुरुपयोगाय आलोचनां कृतवती।

<u>उत्तराखण्डम्-चार धाम यात्रा</u>

उत्तराखण्डराज्ये श्व: अक्षय-तृतीयाया: शुभपर्वणि गङ्गोत्री-यमुनोत्री-इत्येतयो: धाम्नो: कपाटं श्रद्धावनतेभ्य: जनेभ्य: उद्घाटायिष्यते। अनेन साकमेव आधिकारिरूपेण पञ्चविंशत्यधिक द्विसहस्रतमवर्षीया चारधाम इत्याख्या यात्रा समारब्स्यते। अपरत्र आकाशवाणी पञ्चविंशत्यधिक-द्विसहस्रतम वर्षीयाया: चार-धाम-यात्रायाः उद्घाटनस्य सजवप्रसारणं करिष्यति। गङ्गोत्रीधाम्नः उद्घाटनस्य प्रत्यक्षप्रसारणं श्वः प्रातः दशवादनतः एकादश वादनपर्यन्तं भविष्यति, तत्रैव यमुनोत्री- धाम्नः प्रत्यक्षप्रसारणं प्रातः सार्धैकादश वादनतः सार्ध द्वादश वादनपर्यन्तम् भविष्यति। **केदारनाथधाम्नः उद्घाटनस्य प्रत्यक्षप्रसारणं मई-मासस्य द्वितीये दिनाङ्के प्रातः षड् वादने उपलभ्यते, बद्रीनाथधाम्नः उद्घाटनस्य सजवप्रसारणम् आगामिमासस्य चतुर्थे दिनाङ्के प्रातः सार्ध षड् वादनादारभ्य सार्धसप्त**

**वादनपर्यन्तं भविष्यति।** आकाशवाण्याः इन्द्रप्रस्थ, एफ.एम.गोल्ड्, आराधना वाहिनीसु अपि च Newsonair चलदुरभाषीय तन्त्रांशेऽपि प्रत्यक्षप्रसारणं उपलभ्यते।

## दिल्ली-शुल्कविधेयकप्रारूपम्

दिल्ली-मन्त्रिमण्डलेन अद्य राष्ट्रिय-राजधान्यां स्वायत्त-सर्वकारीय-विद्यालयो: शुल्कस्य विनियमनार्थं प्रारूप-विधेयकम् एकम् अनुमोदितम्। विद्यालयस्य शुल्कस्य अत्यधिकवृद्धेः विषये अभिभावकेषु वर्धमानाया: निराशायाः प्रतिक्रियारूपेण अयं निर्णयः कृतः। नवदिल्ल्याम् सञ्चारमाध्यमान् सम्बोधयन्ती मुख्यमन्त्री रेखागुप्ता अवदत् यत् दिल्ली-प्रशासनम् जनानां, विशेषतः छात्राणां, तेषां मातृपितृणां च कृते आश्वासनम् आनेतुं ऐतिहासिकं निर्णयम् गृहीतवत्। अनया प्रतिपादितम् यत्, प्रथमवारं दिल्ली-प्रशासनेन एतादृशं विस्तृतं दोषरहितं च विधेयकं रचितम् अस्ति इति। **श्रीमती गुप्ता अवदत् यत् विधेयकं दिल्ली-नगरस्य सर्वेषु विद्यालयेषु, साहाय्यप्राप्त-अनुदानरहित-स्वायत्त-संस्थाभिः सह, शुल्कनिर्धारणार्थं सम्पूर्णानि मार्गदर्शकानि, प्रक्रियाः च निरूपयति।**

## विपक्षदलीयम् -पत्रम्

पहलगामे क्रूरातङ्क्याक्रमणस्य अनन्तरं राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन खर्गे इत्येष: लोकसभायां विपक्षस्य नेता राहुलगान्धी च संसद: विशिष्टस्य सत्रस्य आह्वानं कृतवन्तौ। प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति भिन्न-पत्रेषु उभौ नेतारौ आग्रहं कृतवन्तौ यत् राष्ट्रियैकतां संकल्पं च प्रदर्शयितुं शीघ्रमेव द्वयोः सदनयोः विशेषसत्रं समाहूतव्यम्। श्रीखर्गे इत्ययं अवदत् यत् यस्मिन् काले एकता अत्यावश्यकी अस्ति, तस्मिन् काले निर्दोषनागरिकाणामुपरि आक्रमणस्य अनन्तरं राष्ट्रस्य सामूहिकेच्छायाः शक्तेः अभिव्यक्तिः भविष्यति। तत्रैव पहलगामातङ्क्याक्रमणस्य विषये संसदः विशिष्टसत्रस्य आग्रहे अद्य भाजपेति दलेन काङ्ग्रेसदलस्य आग्रहस्य खण्डनं कृतम्। दलप्रवक्ता शहजाद पूनावाला नवदिल्ल्यां वार्ताहरैः सह चर्चायां अवदत् यत् काङ्ग्रेसप्रमुखः मल्लिकार्जुनखर्गे इत्ययं पूर्वं उत्तरं प्रदद्यात् यत् आतङ्क्याक्रमण-विषये काङ्ग्रेसदलस्य सामूहिकसंकल्पः कोऽस्ति।

## प्रधानमन्त्री-कनाडादेश:

कनाडादेशे सञ्जाते मतदाने मार्क-कार्नी इत्येतस्य नेतृत्वयुतेन लिबरल-पार्टी-इत्येद्दलं विजितम्। प्रधानमन्त्री-नरेन्द्रमोदी विजिताय मॉर्क-कार्ने-इत्येतस्मै कनाडादेशस्य प्रधानमन्त्रिपदाय चयनिते सति वर्धापनानि प्रदत्तवान्। सामाजिक-सन्देशपटले श्रीमोदिना लिखितं यत् भारत-कनाडा-देशौ पारस्परिक-लोकतान्त्रिक-मूल्यानां विधेश्च शासनं प्रति दृढप्रतिबद्धतया जीवन्तसम्बन्धैः च सह संयुक्तौ स्तः।

## आई.पी.एल्.

आई.पी.एल्. इत्येतस्यां विंशति प्रतिविंशति क्रिकेट-स्पर्धा-मालिकायाम् अद्य सायंकाले सार्ध सप्तवादने समारप्स्यते। नवदिल्ल्याः अरुणजेटली क्रीडाङ्गणे डेल्ही-कैपिटल्स-कोलकाता नाइट-राइडर्स-दलयोर्मध्ये द्वन्द्वं भविष्यति।

**क्रिकेट्/महिला:**

महिलानाम् एकदिवसीयान्ताराष्ट्रिय-त्रिकोणीय-क्रिकेट्-स्पर्धा-श्रृङ्खलायां कोलम्बो-नगरे अद्य भारतीय-महिला-वृन्दं दक्षिणाफ्रीका-दलं पञ्चदश धावनाङ्कै: पराभूय निरन्तरम् द्वितीयं विजयं समाधिगतवत् ।